# Shri Kaluramacharyanirmitam Shriramabrahma Ashtakam

# શ્રીકાલૂરામાચાર્યનિર્મિતં શ્રીરામબ્રહ્માષ્ટકં

## Document Information

Text title : Shri Kaluramacharyanirmitam Shriramabrahma Ashtakam

File name : shrIrAmabrahmAShTakaMkAlUrAmAchArya.itx

Category : raama, rAmAnanda, aShTaka

Location : doc_raama

Author : kAlUrAmAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીકાલૂરામાચાર્યનિર્મિતં શ્રીરામબ્રહ્માષ્ટકં

નમસ્કૃત્ય ગુરં રામાનન્દં ભાષ્યકૃતં તથા ।
મુક્તિદમષ્ટકં કુર્વે શ્રીરામબ્રહ્મણઃ શુભમ્ ॥ ૧॥

સર્જકો જગતો યશ્ચ જગતઃ પાલકશ્ચ યઃ ।
જગત્સંહારકો યશ્ચ રામં બ્રહ્મ નમામિ તમ્ ॥ ૨॥

યેન સમ્પાદિતા વેદાઃ પ્રદત્તા બ્રહ્મણે તથા ।
બ્રહ્મા ચોત્પાદિતો યેન રામં બ્રહ્મ નમામિ તમ્ ॥ ૩॥

આમનન્તિ ચ વેદા હિ સર્વે નિત્યં ચ યત્પદમ્ ।
શ્રુતિવૃન્દાન્વિતં રમ્યં રામં બ્રહ્મ નમામિ તમ્ ॥ ૪॥

યસ્યાનન્દસ્ય વેત્તા હિ ન વિભેતિ કુતશ્ચન ।
ધ્યેયાનન્દમયં ધ્યેયં રામં બ્રહ્મ નમામિ તમ્ ॥ ૫॥

સર્વં ભવતિ વિજ્ઞાતં યસ્ય વિજ્ઞાનતઃ કિલ ।
ઉપાદાનં હિ સર્વેષાં રામં બ્રહ્મ નમામિ તમ્ ॥ ૬॥

નરો યસ્ય પ્રપત્ત્યા હિ સર્વેભ્યોઽભયતામિયાત્ ।
સર્વશક્તિં ચ સર્વેશં રામં બ્રહ્મ નમામિ તમ્ ॥ ૭॥

યશ્ચ લભ્યો હિ સર્વેષાં સ્વભક્ત્યૈવાર્ચિરાદિના ।
ભજનીયં દયામ્ભોધિં રામં બ્રહ્મ નમામિ તમ્ ॥ ૮॥

દિવ્યદેહગુણો યશ્ચ નિર્દોષો દિવ્યભૂષણઃ ।
દિવ્યધામપ્રદં દિવ્યં રામં બ્રહ્મ નમામિ તમ્ ॥ ૯॥

દ્વારપીઠેશ્વરશ્રીમત્કાલૂરામાર્યનિર્મિતઃ ।
પઠતામષ્ટકં ચેદં ભવતાદ્ ભક્તિમુક્તિદમ્ ॥ ૧૦॥

ઇતિ શ્રીકાલૂરામાચાર્યનિર્મિતં શ્રીરામબ્રહ્માષ્ટકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mrityunjay Pandey

*Shri Kaluramacharyanirmitam Shriramabrahma Ashtakam*
pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*